# पाणिनेरष्टाध्यायीजाम्बवतीविजयग्रन्थयोः समीक्षणम्

**नागेन्द्र गौतमः**
उपप्राध्यापकः, व्याकरणविभागः
नेसंवि, जनताविद्यापीठम्, दाङः, नेपालः
nagendragautam235@gmail.com
https://doi.org/10.3126/haimaprabha.v25i01.96672

***सारसङ्क्षेपः***

*आलेखेऽस्मिन् पाणिनिप्रणीतयोरष्टाध्यायीजाम्बवतीविजयकाव्ययोः गुणाः वैशिष्ट्यानि च सविस्तरं निरूपितानि सन्ति। अयमालेखः गुणात्मकस्वरूपे सज्जीकृतो वर्तते। न केवलं पाणिनिः परमव्याकरणाचार्यः, अपि तु काव्यविद्यायामपि दक्षः सिद्धहस्तश्चासीदिति तथ्यं प्रदर्शयितुमिह प्रयासः कृतः। पाणिनिः महेश्वरप्रसादाल्लब्धानि 'अइउण्' इत्यादीनि चतुर्दशसूत्राणि उपजीव्य प्रत्याहारमुद्रया 'वृद्धिरादैच्' इति प्रथममङ्गलाचरणसूत्रात् व्याकरणमारभ्य "अ अ" इति सूत्रे अष्टाध्याय्याः समाप्तिं विदधाति। अष्टाध्याय्यामपि चतुर्दशनियमानां विशेषरूपेण विमृश्यन्तेऽत्र। धातुपाठः, गणपाठः, लिङ्गानुशासनञ्च पाणिनिना प्रणीतमित्यपि कतिपयैः मन्यते, तथापि व्याकरणप्रमाणं पाणिनीयमेव। यथोक्तं महाभाष्ये 'प्रायेण पाणिनीयं व्याकरणं प्रामाण्यम्"। संस्कृतभाषायाः व्याकरणे सर्वाधिकं प्रसिद्धेऽष्टाध्यायीग्रन्थे भाषायाः स्वरूपनियमाः, रचनाविधानञ्चात्यन्तं वैज्ञानिकरूपेण निरूपितवान्। भाषा न केवलं मनुष्यप्रयोगस्य साधनमपि तु ब्रह्मस्वरूपस्याभिव्यक्तिरूपं मन्यते। अष्टाध्यायी अस्य सिद्धान्तस्य व्यावहारिकरूपं प्रदर्शयति- "शब्द एव सत्यस्य प्रतीकः, भाषायामेव च चेतनायाः प्रकाशः" अष्टाध्यायी केवलं संस्कृतव्याकरणस्याधारस्तम्भ न, अपि तु दर्शनस्य, भाषाशास्त्रस्य, तर्कशास्त्रस्य च संघटितरूपं दार्शनिकदर्पणमस्ति। एषः ग्रन्थः मानवविचारस्य शास्त्रीयता, सूक्ष्मता, तर्कशुद्धता च प्रदर्शयति। "आदौ व्याकरणं काव्यमनुजाम्बवतीविजयम्" इति राजशेखरस्य पद्यरत्नेन ज्ञायते यत् पाणिनिना "जाम्बवतीविजयम्" काव्यपुष्पस्य च रचना विहिता। भाष्यकारेण व्याकरणस्य लक्षणं कुर्वता लिखितं यत् "लक्ष्यलक्षणे व्याकरणम्"। अतो यत्र पाणिनिना शब्दानां लक्षणेभ्यः "अष्टाध्यायी" विरचिता तत्र तेषां लक्षणानां लक्ष्यानाञ्च परिज्ञानाय जाम्बवतीविजयकाव्यस्यापि रचना कृता। अस्यापरं नाम "पातालविजयः" इत्यस्ति। प्राचीनकाले सूर्यदेवेन दत्तः स्यमन्तकरत्नमणिः लोककल्याणस्य प्रतीकत्वेन सत्राजितस्य गृहं शोभयति स्म। तस्मिन्नन्तरे प्रमदस्य निधनमारोप्य दूषणा श्रीकृष्णे कृताभूत्। निन्दां निराकर्तुं कृष्णः स्वमेव अरण्यप्रदेशं प्रविश्य मणेरन्वेषणम् आरब्धवान्। जाम्बवत-कृष्णयोः युद्धं दीर्घदिवसपर्यन्तं प्रचलितम्। अन्ते जाम्बवान् युद्धेन शान्तः, कृष्णे रामावतारस्य तेजः दृष्ट्वा साष्टाङ्गं प्रणिपत्य-"त्वमेव राघवो रामः, अहं पुरा तव सेवकः" इति ज्ञात्वा मणिं समर्पितवान्। उपरि जाम्बवतीं स्वकन्यां रत्नसमां कृष्णाय नैवेद्यरूपेण दत्तवान्। ग्रन्थद्वयोः कर्ता पाणिनिरेक एव उत नेत्याकारकसमस्यायाः समाधानायायमालेखः प्रस्तुतः। अस्मिन् काव्ये दैवीपराक्रमः, सत्यपरिशुद्धिः, भक्तिनम्रता, धर्मसंरक्षणं चाद्भूतरूपेण निरूपितम्। अतो निष्कर्षतः तथ्यं प्रकाशते यत् अष्टाध्यायीव्याकरणग्रन्थस्य कर्ता महर्षिपाणिनिरेव जाम्बवतीविजयकाव्यस्यापि प्राज्ञः प्रणेता स एवायमिति निर्णयः लेखस्य उपसंहारे प्रदत्तो विद्यते।*

**शब्दकुञ्जी-** अष्टाध्यायी, दैवीपराक्रमः, पातालविजयः, ब्रह्मस्वरूपम्, राघवः।

## विषयपरिचयः

पाणिनिना महत्या तपश्चर्यया दैवीप्रेरणया च शिवताण्डवध्वनितः निःश्रुतानि भगवन्तं महेश्वरं प्रसाद्य ततो मन्त्ररूपेणाक्षरसमान्नायमधिगम्य अष्टास्वध्यायेषु गुम्फितं सर्वातिशायि "अष्टाध्यायी" व्याकरणं प्रणीतम् । अस्यां अनुवृत्तिपद्धतिः कुशलतया प्रवर्तिता, येन सूत्रार्थः पुनरुक्तिवर्जितः सुस्पष्टः भवति । सामान्यनियमेषु अपवादानां प्रबलता भाषायाः प्राकृतिकस्वभावं द्योतयति । महेश्वरसूत्राणि वर्णानां वैज्ञानिकसंयोजनं कुर्वन्ति, येभ्यः धातुपाठ-गणपाठ-प्रत्ययसूत्रादीनां तन्त्रं सम्यक् प्रवहति । पाणिनीयसूत्राणि तर्कयुक्तानि, ध्वनिरूपविचारसमन्वितानि च, येनाष्टाध्यायी दार्शनिकभाषाशास्त्रस्यादिग्रन्थत्वेन प्रसिद्धा जाता । वैदिकलौकिकभाषयोः समुचितसमन्वयः, वैज्ञानिकरूपविन्यासः, तथा विश्वमान्यताप्राप्तिः एतान्यस्य मुख्यवैशिष्ट्यानि सन्ति । अष्टाध्याय्याः प्रमुखं वैशिष्ट्यं सूत्रलाघवमस्ति । अल्पाक्षरैरेव महतां व्याकरणतत्त्वानां प्रतिपादनं कृतम् । एतेन ग्रन्थः स्मरणयोग्यः, प्रयोगयोग्यश्च भवति । अन्यदत्यन्तं महत्त्वपूर्णं वैशिष्ट्यं प्रत्याहारमूलकत्वम् । महेश्वरसूत्रैः वर्णसमूहानां संक्षिप्तप्रयोगः कृतः, येन नियमनिर्देशः अत्यन्तं सुगमः जातः । तथैव अनुवृत्तिप्रणाली अष्टाध्याय्याः विशिष्टता वर्तते । एकस्मात् सूत्रादन्यस्मिन् सूत्रेऽर्थस्य प्रवाहोऽनुवृत्तिरूपेण गच्छति, येन न्यूनैः सूत्रैः व्यापकविषयस्य निरूपणं सम्भवति । अष्टाध्याय्यामधिकारसूत्राणि अपि सन्ति, येषां प्रभावेणानेकसूत्राणां विषयसीमा निश्चिता भवति । एषा व्यवस्था ग्रन्थस्य सुव्यवस्थिततां द्योतयति । तथा च परिभाषासूत्राणि, नियम-अपवादव्यवस्था, संज्ञासूत्राणि, विधिसूत्राणि चात्र सम्यक् समन्वितानि सन्ति । एतेषां माध्यमेन व्याकरणस्य प्रयोगे स्पष्टता, तर्कसङ्गतता च सिद्ध्यति । अत एवाष्टाध्यायी केवलं व्याकरणग्रन्थो न, अपि तु संस्कृतभाषायाः संरचनात्मकम्, तात्त्विकम्, वैज्ञानिकञ्चाधारग्रन्थरूपेण प्रतिष्ठिता अस्ति । अन्येषां व्याकरणप्रणालीनामपेक्षया पाणिनिना प्रणीतमष्टाध्यायीव्याकरणमेव कुतः कथञ्चातिविशिष्टत्वं प्राप्तम् ? इति जिज्ञासायाः मूलसमाधानान्वेषणपरः प्रयासोऽस्मिन्नालेखे सम्यगुपस्थापितः।

पाणिनिः केवलं व्याकरणाचार्यत्वेन न, किन्तु काव्यसर्जनेऽपि सिद्धहस्त आसीदिति तथ्यं जाम्बवतीविजयकाव्यं प्रमाणयति । जाम्बवतीविजयम् इति काव्यं श्रीकृष्णस्यावतारमहत्त्वम्, भक्तिवैभवं च प्रतिपादयति । अस्य विषयवस्तु स्यमन्तकमणिहरणानन्तरं प्रवृत्तं घटनाक्रममाश्रित्य विकसितं भवति, यत्र श्रीकृष्णः धर्मसंस्थापनाय, लोकसंशयनिवारणाय च स्वपराक्रमं प्रकाशयति । काव्ये जाम्बवता सह श्रीकृष्णस्य दीर्घकालीनं युद्धं केवलं बाह्यबलप्रदर्शनरूपेण न निरूप्यते, अपि तु भक्तभगवतोरन्तरङ्गसम्बन्धस्य प्रतीकरूपेण विविच्यते। जाम्बवान् चिरञ्जीवित्वेन, अपारवीर्येण च युक्तः सन्नप्यन्ततः श्रीकृष्णस्य दैवीस्वरूपमवगम्य तस्मिन् शरणागतिं करोति । अत्र शरणागतिधर्मस्य, भक्तेः च सर्वोच्चत्वं दार्शनिकरीत्या स्थापितं दृश्यते । श्रीकृष्णस्य विजयः केवलं शस्त्रबलजन्यः न, किन्तु धर्मबलसमन्वितः इति भावः काव्यस्य अन्तरात्मा भवति । युद्धस्य समाप्तौ जाम्बवत आत्मसमर्पणम्, तथा जाम्बवत्याः श्रीकृष्णे विवाहेन समर्पणमित्येतौ द्वौ प्रसङ्गौ जीवात्मपरमात्मनोरैक्यभावं सूचयतः । एवं जाम्बवतीविजयकाव्यं वीररसप्रधानं सन्नप्यन्ततो भक्तिरसस्य उत्कर्षं साधयति । धर्मः, भक्तिः, पराक्रमः, अनुग्रहश्चैतानि चत्वारि तत्त्वानि समन्वितरूपेण अस्य काव्यस्य विषयवस्तुं महत्त्वं च निर्धारयन्ति । अस्य काव्यस्य कलाशिल्पम्, लालित्यञ्च दृष्ट्वा पाणिनिना एतत्काव्यं न विरचितमिति भ्रान्तिं निराकर्तुं चैषा लेखनी प्रयत्नं करोति।

## अध्ययनविधिः

प्रस्तुतमिदमनुसन्धानकार्यं मूलतो निगमनात्मकविधिं समीक्षणात्मकविधिं च समादृत्य विहितमस्ति । अस्मिन् अनुसन्धाने प्रयुक्तोऽध्ययनविधिस्तु इत्थं वर्तते-

**अध्ययनस्य स्वरूपम्-** अत्रानुसन्धाने पाणिनेरष्टाध्यायीग्रन्थे जाम्बवतीविजयकाव्ये च प्राप्तानां तथ्यानां विश्लेषणं विधाय निष्कर्षः प्रस्तुतो वर्तते। अतोऽनुसन्धानमिदं विशेषतो गुणात्मकस्वरूपे सज्जीकृतं वर्तते।

**आदर्शचयनम्** उद्देश्यमूलकम् अध्ययनमिदम् अस्ति । सत्सु व्याकरणसम्बद्धविविधेषु विषयेषु महर्षिणा पाणिनिना रचितग्रन्थसम्बद्धम् - 'पाणिनेरष्टाध्यायीजाम्बवतीविजयग्रन्थयोः समीक्षणम्' इति शीर्षकं गृहीतं वर्तते।

**तथ्यसङ्कलनम् -** अध्ययनेऽस्मिन् पाणिनीयव्याकरणसम्बद्धान् ग्रन्थान् यथावश्यकं तदन्याँश्च ग्रन्थान् अवलोक्य तथ्यं सङ्कलितं
वर्तते । अतः व्याकरणशास्त्रसम्बद्धा मूलग्रन्थाः, तद्व्याख्याग्रन्थाश्चात्र सामग्रीरूपेण पाणिनिरचितग्रन्थप्राधान्यात् तत्रापि च तद्ग्रन्थानां च व्याकरणसम्बद्धत्वात् अत्र मुख्यरूपेण पाणिनीयव्यारणग्रन्थान् तत्सम्बद्धानन्याँश्च ग्रन्थान् अवलोक्य तथ्यं सङ्कलितं वर्तते।

**तथ्यसङ्कलनसाधनानि -** शोधोऽयं ग्रन्थाश्रितो वर्तते, प्रस्तुते आलेखे अष्टाध्यायीसम्बद्धस्यात्यन्तसूत्रात्मकताविषयस्य अनुवृत्तिप्रणालीविषयस्य अष्टपदीक्रमस्य परत्वापरत्वनियमस्य च सिद्धान्तस्याथ जाम्बवतीकाव्यगतायाः पदशुद्धतायाः विषयसम्बद्धानां तथ्यानां सङ्कलनं विहितं वर्तते । अत्राष्टाध्यायीजाम्बवतीकाव्ययोः समीक्षणक्रमे कृतानुसन्धानकार्यस्याध्ययनम्, तेभ्यः प्राप्ततथ्यानां समीक्षणं विश्लेषणञ्च विधाय निष्कर्षः प्रदत्तोऽस्ति । एवमेव प्राथमिकद्वितीयकसामग्रीमाध्यमेनेदमनुसन्धानं विहितमस्ति । अत्र पाणिनेरष्टाध्यायीजाम्बवतीविजयकाव्यग्रन्थौ प्राथमिकस्रोतस्त्वेन गृहीतौ वर्तेते। एतद्विषयसम्बद्धाः भाषान्तरेष्वनूदितग्रन्थाश्च द्वितीयकस्रोतस्त्वेन गृहीतास्सन्ति।

**तथ्यविश्लेषणप्रक्रिया-** शोधलेखेऽत्र यथावश्यकं प्राप्ततथ्यानां समीक्षणात्मकप्रक्रिया समादृता वर्तते । सङ्कलितानां सामग्रीणां विश्लेषणं विधायान्ते निष्कर्ष: प्रस्तुतो वर्तते। एवमेव लेखकमितिपद्धतेः (एपिए) प्रयोगोऽप्यत्र विहितो वर्तते।

## सैद्धान्तिकाधार:

अस्यानुसन्धानात्मकस्यालेखस्य परिपूर्तये विशेषतो व्याकरणसम्बद्धौ पाणिनेरष्टाध्यायीजाम्बवतीकाव्यग्रन्थौ सैद्धान्तिकाधारेण गृहीतौ स्तः । पाणिनिप्रणीता अष्टाध्यायी, जाम्बवतीविजयकाव्यञ्चैतदतिरिक्तं श्रीमद्भागवतमहापुराणम्, परमलघुमञ्जूषा, वैयाकरणसिद्धान्तकौमुदी चेत्यादिग्रन्था अप्यालेखस्य वैशिष्ट्यप्रतिपादनाय सैद्धान्तिकाधारत्वेन सङ्गृहीताः। एकत्रैवालेखे ग्रन्थद्वयोः निखिलविषयाणां समीक्षणमसम्भवमिति रीत्या काँश्चन विषयान् एव समादृत्यायमालेखः सज्जीकृतः। एतादृशसैद्धान्तिकाधारे पाणिनिकृताया अष्टाध्याय्याः, जाम्बवतीविजयकाव्यस्य च समीक्षणं विधाय प्राचीनव्याकरणस्य प्रचलितपरम्परायाः साम्प्रतिकपरम्परया सह समन्वयञ्च कृत्वा अत्यन्तसूत्रात्मकलाघवस्य प्रत्याहारमूलकत्ववैशिष्ट्यप्रतिपादनाय चालेखोऽयं सञ्जीकृतोऽस्ति।

## विषयविश्लेषणम्

महर्षि: पाणिनि: व्याकरणशास्त्रस्य प्रणेतृत्वेन विख्यातोऽस्मिन् जगति। तथापि तस्य प्रतिभा केवलं सूत्ररचनायां न सीमिता, अपि तु काव्यनिर्माणेऽपि समानतया प्रस्फुटिता दृश्यते । पाणिनिकृतयोरष्टाध्यायी जाम्बवतीविजयश्चैतयोः ग्रन्थयोरध्ययनं व्याकरणशास्त्रस्योन्नत्यै तस्यावदानञ्च सम्यक्तया चिन्तनीयम् । अष्टाध्यायी संस्कृतव्याकरणस्य

प्रामाणिकमूलग्रन्थः सन् भाषानुशासनस्य सर्वाङ्गपूर्णं विधानं करोति । अष्टाध्याय्यां संज्ञा-परिभाषा-अधिकारसूत्राणां सुसम्बद्धव्यवस्थाम्, प्रत्याहारमूलकसंरचनाम्, अनुवृत्तिप्रणालीञ्च व्याकरणशास्त्रं वैज्ञानिकपद्धत्या व्यवस्थापयति । अयं ग्रन्थः केवलं भाषिकरूपनिर्णयपरः न, अपि तु अर्थनियमनस्य, प्रयोगशुद्धेः, परम्परासंरक्षणस्य च आधारशिलारूपेण स्थितः । तदनन्तरं जाम्बवतीविजयकाव्ये पाणिनिः स्वस्य कवित्वप्रतिभां स्फुटतया प्रदर्शयति । श्रीकृष्णजाम्बवतोः युद्धकथामाधारीकृत्य रचितं एतत् काव्यं पौराणिकवस्तुनः काव्यात्मकसंस्कारस्य उत्कृष्टमुदाहरणम् । अस्मिन् काव्ये व्याकरणनिष्ठा, शब्दलालित्यम्, छन्दोवैचित्र्यम्, अलङ्कारयोजना च स्वाभाविकरूपेण समन्विताः दृश्यन्ते । अतः पाणिनि: केवलं व्याकरणाचार्यो न, अपि तु सिद्धहस्तमहाकविम् इत्यपि प्रतिष्ठापयति । एवमष्टाध्यायी शास्त्रीयबौद्धिकपरम्परायाः मूलाधाररूपेण पाणिनिं अमरं करोति, जाम्बवतीविजयस्तु तस्य साहित्यिकप्रतिभायाः सौन्दर्यपूर्णं साक्ष्यं ददाति । शास्त्रं काव्यं चोभयोरपि समन्वयेन पाणिनिः संस्कृतवाङ्मयेऽद्वितीयस्थानं प्राप्तवान् इति निश्चयेन वक्तुं शक्यते ।

**(क) अष्टाध्यायी**

अष्टाध्यायीव्याकरणं महर्षिपाणिनिना विरचितं सर्वेषां संस्कृतव्याकरणानां शिरोमणिरूपेण प्रतिष्ठितम् । अस्य वैशिष्ट्यं केवलं नियमप्रणालीमात्रे न सीमितम्, अपि तु वैज्ञानिक-दार्शनिक-व्यवस्थितरूपेण भाषायाः संरचनां निरूपयति । अस्याः मुख्यवैशिष्ट्यानि अधोलिखितरूपेण विविच्यन्ते-

**अत्यन्तसूत्रात्मकता तथा लाघवम्**

अष्टाध्यायी अल्पाक्षरात्मकैः सूत्रैः विरचिता, यत्र प्रत्येकं सूत्रं बहुविधार्थसंवाहकं भवति । "अल्पेन महदुक्तम्" इति सिद्धान्तः अत्र पूर्णतया दृश्यते । लाघवमेव पाणिनीयव्याकरणस्य प्राणतत्त्वं वर्तते । अष्टाध्याय्याः सूत्ररचनायां अत्यन्तसूत्रात्मकता तथा लाघवम् इत्येतौ मुख्यौ प्राणभूतगुणौ स्तः । परिभाषात्मकदृष्ट्या 'अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखम्' इति सूत्रलक्षणस्य व्यावहारिकसिद्धिरेतयोः समन्वयेनैव भवति । यत्र न्यूनतमपदप्रयोगेण अधिकतमोऽर्थः साध्यते, तत् लाघवम् । तदेव परिपक्वावस्थायामत्यल्पाक्षरव्यवस्थया अनन्तार्थव्याप्तिरूपेण प्रकटमाना अत्यन्तसूत्रात्मकतेति कथ्यते । अस्य लाघवस्य साधने पाणिनिना अइउण्, हल्, अच् इत्यादय: प्रत्याहारा: प्रयुक्ता:, येन न प्रत्येकं वर्णस्य पृथक् निर्देश आवश्यक: । यथा- 'इको यणचि' (पा.सू., ६।१।७४) इति सूत्रम् । अत्र इक्=इ उ ऋ लृ, यण्=य व र ल । अत: प्रत्याहारेणात्यधिकं लाघवं साधितम् । अन्यथा सूत्रं दीर्घं भवेत् । एषा लाघवस्य सूक्ष्मप्रणाली । एवञ्च भाष्यकारेण प्रमाणयति -'लघ्वर्थं चाध्येयं व्याकरणम्' । यथा- बृहस्पतिरिन्द्राय दिव्यवर्षसहस्रं प्रतिपदोक्तानां शब्दानां पारायणं प्रोवाच नान्तं जगाम, वृहस्पतिश्च प्रवक्ता इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालोऽन्तञ्च न जगाम । ब्राह्मणेनावश्यं शब्दा ज्ञेया इति, न चान्तरेण व्याकरणं लघुनोपायेन शब्दा: शक्या विज्ञातुम् (शास्त्री, सन् १९९१, पृ. ५३) । एतेषां सर्वेषां समुचितसमन्वयेन सूत्रेषु अप्रयोगेऽपि व्यापकः, गूढः, बहुविधश्चार्थः बोध्यते । अत्र परिभाषा अप्यत्यन्तमहत्त्वपूर्णाः, यतः ताः सूत्रार्थनिर्णये, विरोधसमाधाने, तथा लाघवरक्षणे नियामिकारूपेण कार्यं कुर्वन्ति । एवं समग्रदृष्ट्या लाघवमुपादानकारणरूपेण, अत्यन्तसूत्रात्मकता तस्य परिणामरूपेण, परिभाषाः तु तयोः नियामिकारूपेण व्यवस्थिताः सन्ति । एतेषां संयुक्तप्रभावेण पाणिनीयव्याकरणं सूक्ष्मतन्त्रबद्धम्, वैज्ञानिकम्, अत्यल्पशब्दसमन्वितञ्चाद्वितीयं शास्त्ररूपेण प्रतिष्ठितम् ।

**अनुवृत्तिप्रणालीद्वारा सूत्रसंयोजनम्**

अष्टाध्याय्यामनुवृत्तिप्रणाली अत्यन्तं प्रभावयुताऽस्ति। पूर्वेभ्य: पूर्वेभ्य: सूत्रेभ्य: उत्तरोत्तरेषु सूत्रेषु आवश्यकानि पदानि अनुवर्तन्ते । तेनानायासेन अल्पाक्षरेणैव सूत्रार्थ: बोधो भवति । यथा 'आद् गुण:' (पा.सू., ६।१।८४) इति सूत्रमस्माभिरित्थं पठ्यते- आत्, पञ्चम्या एकवचनान्तम्, गुण:, प्रथमैकवचनान्तं पदम् । अत्र सूत्रे 'एक: पूर्वपरयो:' (पा.सू., ६।१।८२), 'इको यणचि' (पा.सू., ६।१।७४), 'संहितायाम्' (पा.सू.,६।१।७०) इति सूत्रेभ्य: एक: पूर्वपरयो:, अचि, संहितायामिति पदानामनुवृत्तिरपकृष्यते । तेन सूत्रस्यार्थ इत्थं सम्पद्यते- आत् अचि संहितायां पूर्वपरयो: गुण: एक: स्यात् । 'सूत्र एव सूत्रस्यार्थ:' इति रहस्यम् (जिज्ञासुः, वि.सं. २०३५, पृ.२८), । स चार्थ: छात्रेभ्य: सूत्रत एव बोधनीयो भवति । एकस्मिन् सूत्रे निर्दिष्टस्य पदस्य वाऽर्थस्य प्रवाहः परसूत्रेषु स्वयमेव भवति । एतेन सूत्राणां सङ्ख्या न्यूनतयापि अर्थसमृद्धिः साध्यते ।

### उत्सर्ग-अपवादनियमव्यवस्था

अष्टाध्यायीव्याकरणस्य प्राणतत्वम् उत्सर्ग-अपवादसिद्धान्त: । सामान्यनियमाः (उत्सर्गाः) प्रथमं प्रतिपाद्यन्ते, तेषां बाधकाः विशेषनियमाः (अपवादाः) अनन्तरं निर्दिश्यन्ते । अयं क्रमः व्याकरणस्य सूक्ष्मविवेचनक्षमत्वं सूचयति । उपदेशावस्थायां प्रत्ययादिषु ये हल्वर्णा: तेषाम् इत्संज्ञाविधायकम् उत्सर्गसूत्रमस्ति- 'हलन्त्यम्' (पा.सू.,१।३।३) इति । अनेन उपदेशे स्थितस्य प्रत्ययादे: अन्त्य: हल्वर्ण: इत्संज्ञक इति नियम: सिद्ध्यति । अनेन विहितस्य इत्संज्ञानियमस्य अपवादसूत्रमस्ति- 'न विभक्तौ तुस्मा:' (पा.सू.,१।३।४) इति । विभक्तिप्रत्ययेषु अन्ते तवर्ग:, स, म चैते वर्णा विद्यन्ते तर्हि ते वर्णा अनुबन्धरूपेण न गृह्यन्ते, न च तेषां लोप: विधीयते । अपरञ्च धातो: विहितस्य प्रत्ययस्य उत्सर्गसूत्रमस्ति-'कर्मण्यण्' (पा.सू.,३।२।१) इति । 'कर्मणि' उपपदे धातोरण् स्यादिति । यथा- कुम्भकार: इत्यत्र अनेन अण् विधीयते । अस्यापवादसूत्रमस्ति- 'आतोऽनुपसर्गे क:' (पा.सू., ३।२।३) इति । 'कर्मणि' उपपदे आदन्तात् धातोरनुपसर्गात्क: स्यादिति । तेन गोद: इत्यत्रानेन कप्रत्ययो भवति । इत्थम् अष्टाध्यायीसूत्रक्रमनियमस्य परिभाषेन्दुशेखरे च परिभाषारूपेण व्यवस्थित: 'पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गा:, प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते' (त्रिपाठी, सन् १९९१, पृ.२३५) एतद् वचनद्वयं 'प्रातिपदिकार्थ'सूत्रभाष्ये सर्वत्र सहैव पठ्यते । तेनैतद् वचनद्वयं संहृत्यैव विशिष्टार्थबोधजनकम् । मीमांसायां तु तात्त्विकरूपेण प्रतिपादित: 'सर्वे पशवो हन्तव्या:' इति सामान्यविधानम् । 'गां मा हिंस्यात्' इति विशेषविधानम् । एष: न्यायोऽष्टाध्यायीव्यवस्थानुसारेण स्थापितोऽस्ति ।

### परत्वपूर्वत्वनियम:

अष्टाध्यायीव्याकरणस्य सूत्रप्रवृत्तिनिर्णये परत्वपूर्वत्वनियमौ महत्त्वपूर्णौ स्तः । **परत्वनियमः-** 'विप्रतिषेधे परं कार्यम्' (पा.सू., १।४।२) इति सूत्रेण प्रतिपादितः । यदा द्वयोः सूत्रयोरेकस्मिन् स्थले प्रवृत्तिसामर्थ्यं भवति तथा तयोः परस्परविरोधः (विप्रतिषेधः) दृश्यते, तदाऽष्टाध्याय्यां पश्चात् स्थितं सूत्रमधिकबलवद् भवति । अतस्तदेव कार्यं करोति, पूर्वसूत्रं तु बाध्यते । यथा- वृक्षेभ्य: इत्यत्र वृक्ष+भ्यस् इति स्थिते 'सुपि च' (पा.सू., ७।३।१०२) इति दीर्घ:, 'बहुवचनं झल्येत्' (पा.सू., ७।३।१०३) इति । एत्वञ्च युगपत्प्राप्तौ सत्यां परत्वात् एत्वमेव साध्यते ।

**पूर्वत्वनियमः-** प्रक्रियाक्रमरक्षणार्थं 'पूर्वत्रासिद्धम्' (पा.सू., ८।२।१) इति सूत्रेण पूर्वत्वसिद्धान्तः व्यवस्थितः । अस्य भावः- त्रिपाद्यां कृतानि कार्याणि पूर्वसूत्रदृष्ट्या असिद्धवत् गृह्यन्ते, येन प्रक्रियायाः क्रमः सुरक्षितः भवति । उदाहरणम्- मनोरथ: इत्यत्र

मनर्+रथ: इति स्थिते 'हशि च' (पा.सू., ६।१।११४), 'रो रि:' (पा.सू., ८।३।१४) उत्वं रुत्वञ्च युगपत् प्राप्तौ पूर्वत्वात् उत्वमेव साध्यते। अतः परत्वेन सूत्रसंघर्षे निर्णयः, पूर्वत्वेन तु प्रक्रियाक्रमस्य संरक्षणमिति पाणिनीयव्यवस्थायाः सूक्ष्मता प्रकाशते।

**अष्टपदीक्रम:**

व्याकरणग्रन्थस्याध्ययनपरम्परायामष्टपदीक्रमः वैशिष्ट्येन प्रसिद्धः। अयं क्रमः शिक्षणसुलभतां दृष्ट्वा व्यवस्थितः, यत्र व्याकरणविषयाः क्रमशः प्रतिपाद्यन्ते।

**संज्ञापरिभाषाप्रकरणम्**

अष्टाध्यायीव्याकरणे संज्ञापरिभाषे उभेऽपि तन्त्रस्य आधारस्तम्भभूते स्तः। संज्ञासूत्राणि लाघवेन बह्वर्थबोधनं कुर्वन्ति, येन शास्त्रे संक्षिप्तता सिद्ध्यति। परिभाषासूत्राणि पुनः नियमप्रयोगे निर्णयं कुर्वन्ति, तथा सूत्राणां सम्यगनुशासनं विधास्यन्ति। अतः संज्ञा लाघवहेतुः, परिभाषा तु नियमनहेतुरित्युभयोरपि समन्वयेनैवाष्टाध्याय्याः वैज्ञानिकता, सुसङ्गतता च प्रतिष्ठिता भवति। व्याकरणशास्त्रे प्रयुज्यमानानां तत्त्वशब्दानां संज्ञा तथा नियमस्वरूपाः परिभाषाः निरूप्यन्ते। तेन शास्त्रार्थबोधः सुलभः भवति। यथा- इत्संज्ञासूत्रम्- 'हलन्त्यम्' (पा.सू., १।३।३), वृद्धिसंज्ञासूत्रम्-'वृद्धिरादैच्' (पा.सू., १।१।१), गुणसंज्ञासूत्रम्- 'अदेङ् गुणः' (पा.सू., १।१।२), परिभाषासूत्रम्- 'इको गुणवृद्धी' (पा.सू., १।१।३) इत्यादि।

**सन्धिप्रकरणम्**

पाणिनीयव्याकरणे सन्धिः अत्यन्तं सूक्ष्मतया, सूत्रलाघवेन च निरूपितोऽस्ति। अत्र स्वर-व्यञ्जन-विसर्गसन्धयः यथाक्रमं व्यवस्थिताः सन्ति। 'अचोऽन्त्यादि टि' (पा.सू., ६।१।७७), 'इको यणचि' (पा.सू., ६।१।७७) इत्यादीनि सूत्राणि लाघवेनापि व्यापकं कार्यं साधयन्ति। तत्र स्थानिवद्भावः, परत्व-पूर्वत्वनियमाः, अन्तरङ्ग-बहिरङ्गविचारश्च सन्धिनिर्णये विशेषतयोपयुज्यन्ते। एवञ्च पाणिनीयसन्धिप्रकरणं लाघवयुक्तम्, वैज्ञानिकम्, क्रमबद्धञ्चास्ति यत्- अल्पसूत्रैः व्यापकसन्धिनियमव्यवस्थामनन्तरं वर्णानां संयोगे उत्पद्यमाना विकाराः प्रतिपाद्यन्ते। अत्र स्वरव्यञ्जनयोः परस्परसंयोगजनिताः परिवर्तनरूपाः नियमाः निर्दिश्यन्ते।

**सुबन्तप्रकरणम्**

पाणिनिना 'सुप्तिङन्तं पदम्' (पा.सू., १।४।१४) इति सूत्रेण पदसंज्ञायां परिभाषा सूत्रलाघवेन निर्दिष्टा। अत्र "सुप्" इति सुबन्तप्रत्ययसमूहस्य, "तिङ्" इति तिङन्तप्रत्ययसमूहस्य च ग्रहणम्। तयोः अन्ते भवति इति "अन्तः" इति शब्देन सूचितम्। तदनुसारं यत् किमपि प्रातिपदिकं सुप्प्रत्ययेन, धातुर्वा तिङ्प्रत्ययेन युक्तं स्यात्, तत् "पदम्" इति संज्ञां प्राप्नोति। एवं सुबन्ततिङन्तयोः उभयोरपि पदसंज्ञा विधीयते, न तु केवलं प्रातिपदिकस्य वा धातोः। ततः प्रातिपदिकेभ्यः सुप्-प्रत्यययोगेन नामपदानां निर्माणविधिः विविच्यते। लिङ्ग-वचन-विभक्तयः चात्र निरूप्यन्ते।

**समासप्रकरणम्**

पाणिनिना अष्टाध्यायीव्याकरणे द्वितीय -अध्यायस्य प्रथमपादे समासविधायकानां सूत्राणामुपदिष्टम्। तत्र "समर्थः पदविधिः" (पा.सू., २।१।१) इति सूत्रेण समर्थपदानामेव समासयोग्यता निरूपिता, येन समासस्य मूलाधारः सुस्पष्टः क्रियते।

अत्राव्ययीभावतत्पुरुषद्वन्द्वबहुव्रीहिसंज्ञकानां समासानां वैज्ञानिकविभागः कृतः, यः शब्दार्थसम्बन्धस्य सूक्ष्मविवेचनपरोऽस्ति । समासाः लाघवप्रधानाः सन्तः अल्पशब्देन बह्वर्थप्रतिपादनसमर्थाः भवन्ति, यथा- राजपुरुषः इत्यत्र 'राज्ञः पुरुषः' इति विस्तृतविग्रहं संक्षिप्यैकपदत्वेनोपस्थाप्यते । एवं च समासे विग्रहवाक्यस्यापेक्षा अर्थबोधाय नितान्तावश्यकत्वेन स्वीकृता, येन तस्य अर्थप्रधानता प्रकाशते । अनुवृत्तिपद्धतेः च सूक्ष्मप्रयोगेण सूत्रेषु पुनरुक्तिपरिहारः कृतः, लाघवस्य च पराकाष्ठा साधिता । अनेन प्रकारेण समासप्रकरणं न केवलं भाषायाः संक्षिप्ततां वर्धयति, अपि तु तस्याः सौष्ठवं, गाम्भीर्यं च पुष्णाति । अतोऽष्टाध्याय्याः समासप्रकरणं लाघवसूत्रबद्धवैज्ञानिकव्यवस्थासमन्वितम्, अर्थप्रधानम्, व्यापकप्रयोगशीलं च इति निःसंशयं संस्कृतव्याकरणस्यात्युत्तमं प्रकरणमिति निष्कर्षः ।

**स्त्रीप्रत्ययप्रकरणम्**

पाणिनिप्रणीतायां अष्टाध्यायीव्यवस्थायां स्त्रीप्रत्ययप्रकरणं नामात्यन्तं सूक्ष्मनियमसमन्वितं प्रकरणमस्ति । पुल्लिङ्गनपुंसकलिङ्गशब्देभ्य: स्त्रीलिङ्गनिर्माणार्थं ये प्रत्यया: (टाप्, डाप्, ङीप्, ङीष्, ङीन्, ऊङ्, ति) विधीयन्ते, ते चतुर्थाध्यायस्य प्रथमपादे निर्दिष्टा: सन्ति । अर्थभेदानुसारं प्रत्ययविधानम्, जातिवाचक-व्यक्तिवाचक-गुणवाचकादिषु प्रातिपदिकेषु भिन्नाः प्रत्ययाः प्रयुज्यन्ते, येन शब्दानां स्त्रीलिङ्गरूपनिर्माणे सूक्ष्मभेदाः प्रकाशन्ते । तथा च "अजाद्यतष्टाप्" (पा.सू., ४।१।४) इत्यादिभिः सूत्रैः सामान्यविधानस्य विशेषनियमाः अपि निर्दिश्यन्ते, ये अपवादरूपेण व्यवहारं नियच्छन्ति । अत्र केवलं प्रत्यययोगः न, अपि तु रूपपरिवर्तनमपि अपेक्षितम्- गुणः, वृद्धिः, दीर्घत्वञ्चेत्यादीनां प्रक्रियाणां साहाय्येन शब्दानां रूपसिद्धिः भवति । एतेन पाणिनीयव्याकरणस्य सूक्ष्मतां दर्शयति । इदं प्रकरणं लाघवयुक्तसूत्रबद्धतयापि विशिष्यते, यतः अल्पाक्षरैः सूत्रैः बहुनियमाः निर्दिष्टाः सन्ति । एवञ्चैते स्त्रीप्रत्ययाः लौकिकवैदिकसाहित्येषु सर्वत्र प्रचलन्तः सन्ति, येन तेषां सार्वत्रिकप्रयोगयोग्यतापि सिद्धा भवति ।

**कृत्प्रत्ययप्रकरणम्**

पाणिनिप्रणीतायां अष्टाध्यायीव्यवस्थायां कृत्प्रत्ययप्रकरणं नाम धातुभ्यः प्रातिपदिकनिर्माणस्यात्यन्तं महत्त्वपूर्णं प्रकरणमस्ति । पाणिनिना तृतीयाध्यायस्य प्रथमपादे कृत्प्रत्ययविधायकानां सूत्राणामुपदेशः कृतः । धातोः स्वार्थः (क्रियार्थः) कृत्प्रत्यययोगेन भाव-कर्तृ-कर्म-भावकर्मादिरूपेण परिवर्तते; यथा- कृ+त=कृतम्, भू+त=भूतम् इत्यादि । तथा चात्र विविधाः कृत्प्रत्ययाः- क्त, क्त्वा, ल्यप्, तुमुन्, तृच् इत्यादयः सूत्रैः विधीयन्ते, यथा- "क्तक्तवतू निष्ठा:" (पा.सू., ३।२।१०२) इत्यादि । एते प्रत्ययाः भिन्नेषु अर्थेषु प्रयुज्यमानाः शब्दानां नानारूपतां जनयन्ति । अर्थभेदानुसारं प्रत्ययविधानम् अपि अस्य विशेषता- कर्तरि, कर्मणि, भावे, भावकर्मणि इत्यादिषु भेदेषु भिन्नाः कृत्प्रत्ययाः विधीयन्ते । अतः एकस्मात् धातोः अनेकानि प्रातिपदिकरूपाणि निष्पद्यन्ते । अत्र अपवादनियमा अपि दृश्यन्ते, ये सामान्यविधानं परिमार्जयन्ति । एवञ्च गुणः, वृद्धिः, संप्रसारणम्, लोपश्चेत्यादीनां रूपपरिवर्तनप्रक्रियाणां साहाय्येन शब्दसिद्धिर्भवति, यत् पाणिनीयव्याकरणस्य सूक्ष्मतां द्योतयति । इदं प्रकरणं लाघवयुक्तसूत्रबद्धतया विशिष्यते- अल्पाक्षरैः सूत्रैः विस्तीर्णनियमाः प्रतिपादिताः । तथा च कृत्प्रत्ययानां प्रयोगस्संस्कृतभाषायां सर्वत्र दृश्यते- गद्ये, पद्ये, वैदिके लौकिके च ।

**तद्धितप्रत्ययप्रकरणम्**

तद्धितप्रत्ययप्रकरणम् अष्टाध्याय्यामत्यन्तं विशिष्टम्, अर्थप्रधानं च प्रकरणं विद्यते। "तद्धिताः" (पा.सू., ४।१।७६) इत्यनेनाधिकारसूत्रेणारभ्यमाणेऽस्मिन् प्रकरणे प्रातिपदिकेभ्यः नानार्थबोधनाय विविधाः प्रत्ययाः विधीयन्ते। अत्र तद्धितप्रत्ययाः धातुभ्यः न, अपि तु प्रातिपदिकेभ्य एव विहिताः भवन्ति, येन कृत्प्रत्ययेभ्यस्तेषां स्पष्टा भिन्नता दृश्यते। अस्य प्रकरणस्य प्रमुखं वैशिष्ट्यम् अर्थप्रधानतैव, यतः प्रत्येकं प्रत्ययः विशिष्टमर्थं बोधयति; यथा- "तस्यापत्यम्" (पा.सू.,४।१।९२) इति सूत्रेणापत्यार्थेऽणादयः प्रत्ययाः विधीयन्ते। अत्र बहवः प्रत्ययाः- अण्, यञ्, ठक्, इञ्, अच् इत्यादयः नानार्थेषु प्रयुज्यन्ते, तथा च एकः प्रत्ययोऽपि प्रसङ्गभेदेनानेकानर्थान् बोधयितुं समर्थः भवति। अपत्य-मातुल-देश-काल-भाव-तादर्थ्यादयोऽर्थविभागा अत्र व्यवस्थितरूपेण निरूपिताः सन्ति, येन सम्पूर्णं प्रकरणमर्थानुक्रमेण सुव्यवस्थितं दृश्यते। पाणिनिना अत्रापि लाघवस्य परमं पालनं कृतम्, यतः अल्पाक्षरैः सूत्रैः विस्तीर्णोऽर्थविस्तारः निर्दिष्टः। अधिकारसूत्रस्य प्रभावेण समग्रं प्रकरणं नियन्त्रितं भवति, येन सूत्राणां परस्परसम्बन्धः सुस्पष्टः भवति। तद्धितप्रत्ययजन्याः शब्दाः लौकिके वैदिके च भाषायामत्यन्तं प्रचुरतया प्रयुज्यन्ते, अतोऽस्य प्रकरणस्य व्यावहारिकमपि महत्त्वं विशेषेणास्ति। अत एव तद्धितप्रत्ययप्रकरणमर्थप्रधानत्वेन, प्रातिपदिकाश्रितत्वेन, बहुविधार्थवत्तया, लाघवयुक्तसूत्रशैलीनियमनत्वेन चाष्टाध्याय्या अत्यन्तं महत्त्वपूर्णं सूक्ष्मं च प्रकरणमिति।

**तिङन्तप्रकरणम्**

अष्टाध्याय्यां पाणिनिमहर्षिणा प्रतिपादितं तिङन्तप्रकरणं नाम क्रियापदरूपनिर्माणस्य मूलाधारभूतं शास्त्रभागम्। "सुप्तिङन्तं पदम्" (पा.सू., १।४।१४) इति सूत्रेण तिङ्प्रत्ययान्तस्यैव पदसंज्ञा विधीयते, येन धातोः तिङन्तरूपेण वाक्ये प्रवृत्तिः सिद्ध्यति। अत्र तिङ्प्रत्ययाः लकाररूपेण व्यवस्थिताः सन्ति, ये काल-भाव-विध्यादीन् सूचयन्ति- लट् वर्तमानकालम्, लङ् भूतकालम्, लृट् भविष्यत्कालम्, लोट् आज्ञाम्, विधिलिङ् सम्भावनां च बोधयन्ति। एषा लकारव्यवस्था क्रियाया कालिक-भावात्मक-परिसरं सूक्ष्मतया नियच्छति। तिङन्तरूपेषु पुरुषत्रयम् (प्रथम-मध्यम-उत्तम) वचनत्रयं (एक-द्वि-बहु) च परस्परसंयोजनात् नवधा रूपप्रपञ्चः सुसम्बद्धतया निष्पद्यते, यत्र भाषायाः तर्कसंगतिः, रूपशोभा च सम्यगवभासते। परस्मैपद-आत्मनेपदभेदोऽप्यत्र विशेषेण प्रतिपादितः- फलस्य परार्थत्वे परस्मैपदम्, स्वार्थत्वे आत्मनेपदमिति, अयं भेदः केवलं रूपवैचित्र्यं न, अपि तु क्रियाफलदर्शनस्य दार्शनिकमप्याधारं सूचयति। धातूनां भ्वादिगणादिषु विभागः, तेषां विकरणप्रयोगश्च (शप्, श्यन्, श्ना, श, इत्यादयः) तिङन्तनिर्माणे अत्यन्तं महत्त्वं वहन्ति। एतेन धातवः स्वस्वभावानुसारं विविधरूपाणि प्राप्नुवन्ति। तत्र चादेश-आगम-लोपादिनियमाः सूक्ष्मतया प्रवर्तन्ते, येन धातोः रूपपरिवर्तनं शास्त्रसम्मतया विधीयते।

एतेषां प्रक्रियाणां नियमनाय "विप्रतिषेधे परं कार्यम्", "असिद्धवदत्राभात्" इत्यादीनि परिभाषासूत्राण्यपि अप्रत्यक्षतया तिङन्तव्यवस्थां धारयन्ति। अस्य प्रकरणस्य परं वैशिष्ट्यं तु अत्यन्तसूत्रलाघवम्। अल्पाक्षरैः बह्वर्थप्रतिपादनम्, यत्र प्रत्येकं सूत्रं गणितसूत्रमिव निश्चितनियमबद्धं दृश्यते। अनेन पाणिनिः तिङन्तरूपनिर्माणं केवलं वर्णपरिवर्तनरूपेण न, अपि तु वैज्ञानिकप्रणालीरूपेण प्रतिष्ठापितवान्। अतः निष्कर्षतः उच्यते- तिङन्तप्रकरणं पाणिनीयव्याकरणस्य हृदयस्थलम्, यत्र धात्वर्थः काल-पुरुष-वचन-विकरण-संयोगेन सजीवक्रियारूपेण अभिव्यज्यते। अत्र लाघवेऽपि गाम्भीर्यम्, नियमेषु अपि सौष्ठवम्, संक्षेपेऽपि व्यापकता च अद्भुततया दृश्यते; अत एव तिङन्तप्रकरणं संस्कृतव्याकरणे वैज्ञानिकव्यवस्थाया उत्कृष्टतम आधारोऽस्ति। अष्टाध्याय्याः मुख्यलक्षणं सूत्रात्मकलाघवं यत् अल्पाक्षरैरपि व्यापकनियमप्रतिपादनं करोति। यथा "इको यणचि" इत्यनेन संक्षेपेण नियमः निर्दिश्यते। "विप्रतिषेधे परं कार्यम्" इत्यादिभिः परिभाषासूत्रैः नियमप्रयोगे स्पष्टता दृश्यते,

तथा प्रत्याहारप्रणाल्या “अच्” इत्यादिना वर्णसमूहाः सङ्क्षेपेण निर्दिश्यन्ते । “राम+सु⟶रामः”, “भू+लट्⟶भवति” इत्यादीनि उदाहरणानि तस्य वैज्ञानिकशब्दनिर्माणप्रक्रियां दर्शयन्ति । अन्येषु प्राचीनव्याकरणेषु तु एते विषयाः प्रायः विस्तीर्णवर्णनरूपेण, अल्पव्यवस्थिततया च निरूप्यन्ते । अतः पाणिनीयव्याकरणं लाघवयुक्तम्, वैज्ञानिकम्, सम्यग्व्यवस्थितञ्चेति सिद्धम् ।

**(ख) जाम्बवतीविजय:**

जाम्बवतीविजयमिति संस्कृतकाव्यं पाणिनीयव्याकरणपरम्परायाः सजीवप्रयोगरूपेणाप्यवगन्तुं शक्यते । महर्षेः पाणिनेरष्टाध्याय्यां निबद्धाः शब्दनिर्माणनियमाः, समास-प्रत्यय-तद्धित-कृदन्तप्रयोगाश्चास्मिन् काव्ये स्वाभाविकतया प्रकटन्ते । इदं काव्यं केवलं भावप्रधानं न, अपि तु शास्त्रसम्मतभाषाप्रयोगस्य आदर्शदृष्टान्तरूपेणापि प्रतिष्ठितम् । अष्टाध्याय्याः सूत्रात्मकसंरचना यथा अल्पाक्षरत्वेन महार्थप्रकाशनं करोति, तथैव जाम्बवतीविजयकाव्येऽपि संक्षिप्तपदैः गम्भीरार्थप्रतिपादनं दृश्यते । विशेषतः समासप्रयोगेषु (बहुव्रीहि-तत्पुरुष-कर्मधारयादिषु) पाणिनीयनियमानां सुस्पष्टानुसरणं काव्यस्य शुद्धतां दर्शयति । धात्वर्थप्रधानकृदन्तप्रयोगाः च पाणिनीयधातुपाठपरम्परायाः प्रभावं सूचयन्ति । अनुवृत्तिप्रणाली यथा अष्टाध्याय्यां सूत्रार्थस्य प्रवाहं नियच्छति, तथैव काव्येऽपि कथाप्रवाहस्य सौष्ठवं अनुवृत्तिसदृशेन क्रमसामञ्जस्येन निर्वह्यते । अर्थस्यानावश्यकविस्तारं परित्यज्य नियतप्रसङ्ग एव वर्णनं कर्तुं कविः प्रयत्नशीलो दृश्यते, यत् पाणिनीयसूत्रशैल्या: काव्यात्मकप्रतिबिम्ब इव प्रतिभाति । अतः जाम्बवतीविजयकाव्यम् पाणिनीयव्याकरणपरम्परायाः व्यवहारिकस्वरूपं दर्शयति । अष्टाध्याय्या: शास्त्रीयशुद्धतां काव्यरसैः सह संयोज्य प्रस्तुतं काव्यमिति निष्कर्षेण वक्तुं शक्यते । अस्मिन् काव्ये व्याकरणं न बाधकम्, अपि तु काव्यसौन्दर्यस्याधारभूतं तत्त्वं भवतीति पाणिनीयपरम्परायाः महत्त्वं प्रत्यक्षं प्रकाशते । जाम्बवतीविजयकाव्यस्य वैशिष्ट्यानि हीत्थं प्रस्तूयन्ते-

**पदशुद्धता**

पदशुद्धता पाणिनीयव्याकरणस्य प्रमुखं प्रथमं च प्रमाणमभिधीयते । “अपदं न प्रयुञ्जीत” इति भाष्यवचनमपि अस्याः पदशुद्धताया अनिवार्यत्वं प्रबलतया प्रतिपादयति । पाणिनिना “सुप्तिङन्तं पदम्” (पा.सू., १।४।१४) इति पदसंज्ञासूत्रमुपदिष्टम्, यत् पदस्वरूपनिर्णये मूलभूतं मानदण्डत्वेन प्रतिष्ठितमस्ति । अस्यैव सूत्रस्य गूढार्थः काव्येष्वपि सावधानतया परिपालितः दृश्यते । यथा- उदाहरणश्लोकः

सत्राजित: किमकरोद् ब्रह्मन् कृष्णस्य किल्विषम् ।
स्यमन्तक: कुतस्तस्य कस्माद् दत्ता सुता हरे: ॥ (श्रीमद्भागवतमहापुराणम्, १०।५६।२)

अत्र कृष्णस्य, कस्माद्, हरे: इत्यादयः शब्दाः सुबन्ताः सन्ति, “अकरोत्” इति तिङन्तप्रयोगोऽस्ति ।

**समस्तपदप्रयोग:**

महर्षिणा अस्मिन् काव्ये समस्तपदानां यथायोग्यः सुश्लिष्टश्च प्रयोगः कृत इति स्पष्टं प्रतीयते । पदसम्बन्धिनि समासविधौ “समर्थः पदविधिः” (पा.सू., २।१।१) इति सूत्रं तेनोपदिष्टम्, यत् पदानां परस्परसामर्थ्यनिबद्धसम्बन्धं निरूपयति । समर्थपदमेकार्थीभावसामर्थ्यस्यैव बोधकमिति । तेनैकार्थीभावसामर्थ्ययुक्तपदयो: पदानां वा समास इति बोध्यम् (दाहाल:,

२००६, पृ. ३०७) तदेव सूत्रार्थानुसारेण काव्येष्वपि सुचातुर्येण प्रयुक्तं दृश्यते, येन पदानां सौष्ठवम्, अर्थगौरवञ्च सम्यगभिव्यज्यते । यथा- जाम्बवान्तकवीर्येण दर्पितो द्वारकाधिपः । जाम्बवत्याः स्वयंवरं जगाम विजयोत्सुकः ॥ जाम्बवन्तं हन्ति इति जाम्बवान्तकः, उपपदतत्पुरुषसमासः, द्वारकाया अधिप इति द्वारकाधिपः, षष्ठी तत्पुरुषसमासः ।

**कृदन्तप्रयोगवैशिष्ट्यम्**

काव्यस्य सौन्दर्यवृद्धये कृदन्तपदानां यथोचितप्रयोगोऽतीव रमणीयः । धातुभ्यः निर्मितानि कृदन्तपदानि व्याकरणनियमानुसारं काव्येषु दृश्यन्ते । तद्यथा- युद्धं कृत्वा विजित्याथ श्रान्तं नृपवरं हरिः । स्मितवक्त्रां जाम्बवतीं द्रष्टुं त्वरितमानसः ॥ (कृत्वा-कृ+क्त्वा,विजित्य-वि-जि+कत्वा ,ल्यप,द्रष्टुम्-दृश्+तुमुन्) इत्यपि द्रष्टव्यम् ।

**तद्धितान्तशब्दप्रयोगः**

अस्मिन् काव्ये कविना पाणिनीयव्याकरणनियमानुसारं तद्धितप्रत्ययानां समुचितः, सुसङ्गतः च प्रयोगः कृतः, येन काव्यस्य भाषाशोभा तथा अर्थगौरवं विशेषतया वर्धितम् । विशेषतोऽपत्यार्थे, मतुपर्थे, तादर्थ्ये, देशसम्बन्धे च तद्धितप्रत्ययाः यथायोग्यं विनियुक्ताः सन्ति । यथा "यादवः" इति यदुवंशसम्बन्धं बोधयति, "वार्ष्णेयः" इति वृष्णिकुलोत्पत्तिं सूचयति, "द्वारकायाः" इति द्वारकानगरसम्बन्धं प्रकाशयति च । एवं प्रकारेण तद्धितान्तशब्दानां प्रयोगेन पात्राणां वंशपरम्परा, स्थानविशेषः, तथा तेषां विशेषणात्मकस्वरूपं च सुस्पष्टतया अभिव्यक्तं भवति । अतः अयं तद्धितप्रयोगः काव्यस्य वैयाकरणिकशुद्धताम्, अर्थसमृद्धिम्, साहित्यिकमाधुर्यं चाभिवर्धयन् प्रमुखं वैशिष्ट्यरूपेण प्रतिष्ठितोऽस्ति । उदाहरणश्लोकः- जाम्बवत्याः प्रसादेन पौरुषेण च केशवः । जाम्बवतीयसम्बन्धं लोके कीर्तिमवाप सः ॥ अत्र "जाम्बवतीयः" इति तद्धितान्तप्रयोगः ज्ञेयः ।

**अल्पाक्षरत्वेन बह्वर्थप्रकाशनम्**

लघुपदेन बह्वर्थप्रकाशनं पाणिनीयशैली काव्येष्वपि दृश्यते । प्रायेणाचार्याणामियं शैली सूत्रलक्षणे च प्राप्यते । यथा- अल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम् । अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः" ॥ (शर्मा, वि.सं. २०४७ , पृ. ३९)

कविना लघ्वाक्षरैः, सङ्क्षिप्तपदैः वा गूढार्थबहुलता सुशोभिता अस्ति । यत्र न्यूनैः शब्दैः बहवोऽर्थाः, भावाः, रसाः च स्फुटन्ति, तदेव काव्यस्य माधुर्यं वर्धयति । उदाहरणतः समासप्रयोगेण, कृदन्त-तद्धितान्तशब्दैः च, एकस्मिन् पदे एव विस्तृतोऽर्थसङ्घातः निहितः भवति । एतेन काव्ये न केवलं शब्दलाघवम्, अपि तु अर्थगाम्भीर्यं अपि प्रकटते । अल्पेन शब्देन विशालो भावो व्यक्त इति कविशिल्पस्योत्कृष्टतात्र स्पष्टा भवति । यथा- एकेनैव प्रहारेण शत्रवो निहता यदा । तदैव विजयः प्रोक्तो हरिणा धर्मरक्षिणा ॥ यदा धर्मसंरक्षणे निरतः श्रीकृष्ण एकेनैव प्रहारेण समग्रान् शत्रून् विनाशयति, तदैव सः विजयः वास्तविकः, पूर्णः च इति अभिधीयते । अत्र "एकप्रहारः" इति न केवलं शारीरिकबलस्य सूचकः, अपि तु अद्वितीयपराक्रमस्य, दैवीशक्तेः, निर्णयदक्षतायाः च द्योतकोऽस्ति । यः वीरः अल्पप्रयासेन, क्षणमात्रेण चाधर्मशक्तीन् निवारयति, स एव प्रमुखो विजेता भवति । दीर्घसंघर्षः नावश्यकः, किन्तु यत्र धर्मस्य पक्षे स्थित्वा निर्णायकः, प्रभावकारि च कार्यं कुरुते, स एव श्रेष्ठः विजय इति काव्यस्य गूढो भावः ।

**निष्कर्षः**

अन्येषां प्राचीनव्याकरणानां मध्ये पाणिनीयव्याकरणस्य वैशिष्ट्यं परमं विलक्षणम्, सूक्ष्मतरं च दृश्यते। अस्मिन् ग्रन्थे अत्यन्तसूत्रात्मकतया लाघवयुक्ततया च विशिष्यते, यत्र "अल्पाक्षरम् असन्दिग्धम् सारवद् विश्वतोमुखम्" इति सूत्रलक्षणं पूर्णतया परिपालितम् अस्ति । अस्य व्याकरणस्य रचना वैज्ञानिकन्यायैः सुसम्बद्धा, क्रमबद्धा च, यत्र प्रत्येकं नियमः पूर्वापरसम्बन्धेन व्यवस्थितः दृश्यते । प्रत्याहारप्रणाल्या "अइउण्" इत्यादिभिः वर्णसमूहानां संक्षिप्तनिर्देशः क्रियते, यः अन्यव्याकरणेषु न दृश्यते । अधिकारसूत्राणां प्रवृत्त्या एकस्य सूत्रस्य शासनं बहुषु अनुवर्तते, येन समग्रव्यवस्था सुगठिता भवति । "विप्रतिषेधे परं कार्यम्" इत्यादिभिः परिभाषासूत्रैः नियमव्यवस्थायाः सूक्ष्मव्याख्या क्रियते, येन कार्यानुक्रमनिर्णयः सुलभो भवति । असिद्धवद्भावः, अन्तरङ्ग-बहिरङ्गनियमादयोऽपि कार्यप्राधान्यनिर्णयेऽनिवार्यतया उपयुज्यन्ते । एतत् व्याकरणं न केवलं वैदिकभाषायाः, अपि तु लौकिकसंस्कृतस्यापि सम्यग्व्यवस्थापनं करोति, अतः तस्य सार्वभौमिकतापि प्रतीयते । धातुप्रत्ययप्रातिपदिकादीनां माध्यमेन शब्दनिर्माणप्रक्रियात्रात्यन्तसूक्ष्मतया निरूपिता अस्ति । सन्धि-समास-कृत्-तद्धित-तिङन्तादीनि सर्वाणि प्रकरणानि सम्यक् समाविष्टानि सन्त्यत्र। तत्राष्टाध्यायी सर्वाङ्गपूर्णव्याकरणग्रन्थरूपेण प्रतिष्ठिता। एवं गुणसमुदायसमन्वितत्वात् पाणिनीयव्याकरणं न केवलं प्राचीनव्याकरणेषु श्रेष्ठतमम्, अपि तु अद्यापि भाषाविज्ञानपरम्परायां मार्गदर्शकरूपेण स्वीकृतमस्ति।

अस्मिन् पाणिनेरष्टाध्याय्याः जाम्बवतीग्रन्थस्य च समीक्षणे स्पष्टमवगम्यते यत् अष्टाध्यायी व्याकरणशास्त्रस्य परमं प्रामाणिकम्, वैज्ञानिकतत्त्वसमन्वितं चाद्वितीयं ग्रन्थरत्नमस्ति । अस्या अत्यन्तसूत्रात्मकता, लाघवम्, अर्थगौरवम्, व्यवस्थितता, अनवद्यत्वं चैते गुणाः भाषानियमनस्य उत्कृष्टतां द्योतयन्ति । अल्पाक्षरत्वेन बह्वर्थप्रकाशनशक्तिरेवास्याः मुख्यवैशिष्ट्यम् । अधिकारसूत्राणां सुव्यवस्था, अनुवृत्तेः सूक्ष्मताम्, परिभाषाणां निर्णायकत्वम्, उत्सर्गापवादयोः तात्त्विकसमन्वयः, अन्तरङ्गबहिरङ्गनियमाश्चैते सर्वे अष्टाध्याय्याः तार्किकगाम्भीर्यं सुस्पष्टयन्ति । अपरतः जाम्बवतीग्रन्थः तस्यैव व्याकरणतन्त्रस्य साहित्यरूपेण सजीवप्रयोगम्, रसात्मकव्यञ्जनां च प्रदर्शयति । अत्र नियमाः केवलं शास्त्ररूपेण न, किन्तु काव्ये सौन्दर्येण सह प्रकाशिताः सन्ति । अस्य काव्यस्य प्रमुखं वैशिष्ट्यं श्रीकृष्णजाम्बवत्योः दिव्यविवाहप्रसङ्गस्य काव्योपयुक्तया रीत्या सुसम्बद्धनिरूपणम् । अत्र भक्तिरसस्य प्राधान्यम्, तत्रापि माधुर्यभक्तेः सुकुमारप्रकाशः सर्वत्र व्याप्नोति । भाषा प्रसादगुणगौरवयुक्ता, यत्र लाघवं माधुर्यं च समन्वितम् । अलङ्काराणाम् उपमा-रूपकम्-अनुप्रासादीनां यथायोग्यं विन्यासः काव्यस्य शोभां वर्धयति । वर्णनवैचित्र्ये प्रकृतिवर्णनम्, युद्धचित्रणम्, भावव्यञ्जना च कौशलपूर्वकं निबद्धा दृश्यन्ते । छन्दोविधानं सुशास्त्रनियतम्, विविधवृत्तप्रयोगेण काव्ये गाम्भीर्यमाधुर्ययोः समुचितः संयोगः साधितः । नायकस्य श्रीकृष्णस्य दिव्यशौर्यम्, नायिकायाः जाम्बवत्याः कोमलभावश्च समन्वितरूपेण अभिव्यक्तः । अतः निष्कर्षतः उच्यते- व्याकरणं भाषाया आधारः, साहित्यं तस्याः अलङ्कारश्च । उभयोः समन्वयेनैव ज्ञानस्य पूर्णता साध्यत इति निःसंशयं प्रतिपद्यते ।

**कृतज्ञताज्ञापनम्**

आलेखेऽस्मिन् पाणिनेरष्टाध्यायीजाम्बवतीविजयग्रन्थयोः समीक्षणक्रमे, सैद्धान्तिकविषयवस्तुनिरूपणे, प्रविध्यादिविषये च परामर्शं विदधद्भ्यः विषयविज्ञेभ्यः धन्यवादं व्यनज्मि ।

## सन्दर्भग्रन्थसूची

आचार्यः, गोविन्दः (सन् २०१९). *वैयाकरणसिद्धान्तकौमुदी.* (प्रथमो भागः), चौखम्बासुरभारतीप्रकाशनम् ।

जिज्ञासुः, ब्रह्मदत्तः (सन् १९७९). *अष्टाध्यायीभाष्य-प्रथमावृति.* रामलाल कपूर ट्रष्ट प्रकाशन ।

दाहालः, लोकमणिः (सन् २००६). *परमलघुमञ्जूषा*. चौखम्बासुरभारतीप्रकाशनम् ।

मीमांसकः, युधिष्ठिरः (सन् १९९४). *संस्कृतव्याकरणशास्त्रका इतिहास*. रामलाल कपूर ट्रष्ट प्रकाशन ।

व्यासः (वि.सं.२०७९). *श्रीमद्भागवतमहापुराणम्*. गीताप्रेसप्रकाशनम् ।

शर्मा, गोविन्दप्रसादः (वि.सं.२०४७). *पाणिनीयव्याकरणस्यैतिहासिकं परिशीलनम्*. यतिराजग्रन्थमालाप्रकाशनम् । शास्त्री, शिवनारायणः (सन् १९९१). *महाभाष्यप्रदीपप्रकाशः*. परिमल पब्लिकेशन्स प्रकाशन ।

शास्त्री, हरिकृष्णः (सन् १९८९). *संस्कृतवाङ्मयम्*. (प्रथमसंस्करणम्), चौखम्बासुरभारतीप्रकाशनम् ।